Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ श्रीगणेशायनमः अथविवाहपद्धतिलिख्यते तत्रादि
वाहलग्नात्कतिपयावशिष्टदिवसेषुशुभलग्नेविवाहोक्त
क्षेत्रेसंस्कार्य्यपुत्रस्य संस्कार्य्याकन्यायाश्च पितापत्नीभिःसा
हकृताभ्यंगस्नानः अहतवासाःशुभासनेप्राङ्मुखउपवि
श्याचम्य कन्यापितावरपिताचसर्वारंभनिमित्तंगणेशपूजनं
कुर्यात् अर्घ्यंसंस्थाप्य पूजासंकल्पः अद्येहेत्यादि अमुक
गोत्रोऽमुकशर्म्माहं अमुकराशेःकन्यायाविवाहकर्म्मणिस
र्वारंभकर्म्मणिनिर्विघ्नप्राप्तयेगणेशस्यपूजनंकरिष्ये इति
संकल्पः गणेशंसंपूज्य वस्त्रसीवनपक्वान्नादिकरणार्थं कु

ग्राम बवारा, पो.ओ. ...

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰

र्य्यात् ततो विवाहात्पूर्वदिने तद्दिने वा कन्यापिता पूर्वांग[illegible]र्म्म
कुर्य्यात् आदौ गणेशं संपूज्य प्रधानसंकल्पं कुर्य्यात् अद्ये
हेत्यादि देशकालौ संकीर्त्य ऽमुकगोत्रो ऽमुकशर्म्माहं ऽमुके
राशेः अस्याः कन्यायाः बीजगर्भसमुद्भवदुरितक्षयपूर्वक मन्त्रस
हधर्म्मप्रजोत्पादनऽद्यपर्य्यहेषुऽधिकारसिद्धिद्वारा श्रीपरमे
श्वरप्रीत्यर्थं विवाहाख्यसंस्कारं करिष्ये इति संकल्पः मातृ
पूजानांदीश्राद्ध पुण्याहादिकं कृत्वा कलशे नवग्रह पूजनं
विधाय लेख्यगौरीहरयोर्मूर्त्तिं लिखित्वा कन्याहस्तेन पू[illegible]
नं अर्घ्यसंस्थाप्य पूजनसंकल्पः अद्येहामुकगोत्राऽमु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कराशिरमुकेदेव्यहेसकलसौभाग्यसम्पद्ध्ये लेख्यगौ
रीहरयोः पूजनंकरिष्ये एतंतेदेवसवितरिति प्रतिष्ठा
ॐ भूर्भुवः स्वः लेख्येगौरीहरौ सुप्रतिष्ठितौ वरदौ भवतां
अथ ध्यानं सिंहासनस्थां देवेशीं सर्वालंकारभूषितां पी
तांबरधरं देवं चंद्रार्द्धकृतशेखरं करेणाधःसुधापूर्णंक
लशंदक्षिणेनतु वरदंचाभयंवामेनाश्लिष्यचतनुंप्रियां
एवंध्यात्वायजेन्मंत्रैः पुराणभाजनस्तथा स्त्रियः पूजामंत्रः
गौरीहरमहेशानसर्वमंगलदायक पूजांगृहाणदेवेशस
र्वदामंगलंकुरु इतिमंत्रेणपाद्यादिभिःसंपूज्य कन्यादे

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हप्रमाणेनसप्तविंशतितंतुभिः वर्त्तिकांदीपयेत्पश्चाद्व्रत
वि·प· २ संपत्तिहेतवे एवंवर्त्तिकांकृत्वानीराजनंविधाय भोज
नीयब्राह्मणाश्चसुवासिन्यः सुपूजितादशाष्टपंचयुग्मं
वाहरणेनाथतोषयेत् अत्रकात्यायनीमहालक्ष्म्यो
रपिनाममंत्रेणपूजनंकार्यं इतिकन्यापक्षविधिः अथव
रपक्षविधानं अथवरपिताशुभेविवाहात्पूर्वदिनेतद्दिने
वापूर्वांगंकुर्यात् प्रथमंगणेशपूजनंकार्यं आचम्यार्घं
संस्थाप्य पूजासंकल्पः अद्येहामुकोहं अमुकराशिपुत्र राम २
स्यकरिष्यमाणविवाहकर्म्मणः पूर्वांगकर्म्माणिनिर्विघ्न

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तासिद्ध्यर्थे गणेशस्य पूजनं करिष्ये इति गणेशसंपूज्य प्रधा
नसंकल्पः अद्येहेत्यादिदेशकालौ स्मृत्वाऽमुकगोत्रो
ऽमुकशर्म्माहं ऽमुकराशेः ऽमुकशर्म्मणः पुत्रस्य देवपितॄणां
पाककरणहेतु धर्म्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वर
प्रीतये विवाहाख्य संस्कारं करिष्ये तत्पूर्वांगत्वेन मातृपूजा
नांदिश्राद्ध पुण्याहवाचन कलशस्थापन ग्रहपूजनानि क
रिष्ये इति संकल्पः मातृपूजा नांदिश्राद्ध पुण्याहवाचन
कलशस्थापन नवग्रहपूजनं च विधाय वरहस्ते वरमातृ
हस्तेन कंकणबंधनं विधाय सर्वां विवाहसामग्रीं गृही

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लाविवाहपुत्रं मुकुटकंकणाभूषणकौशुंभरंजितवस्त्रा
द्विप. दिभूषितेकलामंगलतूर्य्यघोषणकौसुंभपालाशपु
३ ष्परंजितवस्त्रादिभूषितावरपक्षिणः वरसहिताः कन्यापि
तृगृहंगच्छेयुः कन्यापितावराशिविकाद्यानेस्वगृहस
मीपेवाह्य वरंयानादुत्तार्य्यपादौप्रक्षाल्यस्वयमुदङ्मु
खश्चाचार्य्यसहितंवरंस्वस्तिकादिचर्चितेदर्भोपित्तलकुं
डिकायांवरस्यपादौप्रक्षाल्य तज्जलंशिरसिचाभिषि
च्य यज्ञीयकाष्ठनिर्म्मितचतुष्पादपीठासनेनिवेशयि रामः
त्वा वाग्दत्ताकार्य्या श्चाचम्य गणेशंनमस्कृत्य श्चार्घसं २

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थापनं कुर्य्यात् प्रथमे वाग्दानं विधाय तत्र संकल्पः अद्येहेत्यादि अमुकशर्म्माहं करिष्यमाणकन्यादानोगत्वे नवराय वाग्दानं करिष्ये ततः कुंकुमाक्तानि पंचफलान्यादाय अमुकगोत्रोऽमुकप्रवरोमुकवेदांतशाखाध्यायी अमुकशर्म्माहं अमुकगोत्रोत्पन्नस्याऽमुकप्रवरस्याऽमुकवेदाध्यायिनःऽमुकशर्म्मणः प्रपौत्रायऽमुकशर्म्मणः पौत्रायऽमुकशर्म्मणः पुत्राय ऽमुकनाम्ने विष्णुस्वरूपिणे कन्यार्थिने वराय अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्यऽमुकवेदाध्यायिनः अमुकशर्म्मणः प्रपौत्री अमुकशर्म्म

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰ ४

णः पौत्री अमुकशर्म्मणः पुत्री अमुकनाम्नी श्रीरूपिणीव
रार्थिनी कन्यां ज्योतिर्विदादिष्टे मुहूर्त्ते तुभ्यं दास्ये तत्प्र
तिग्रहार्थं एभिर्गंधाक्षतपुष्पफलद्रव्यभूषणाद्युपचा
रैस्त्वामहं वृणे इति वरं वृत्वा वाग्दानं कृत्वा अथ द्वारागत
वरपूजा आचम्य अर्घस्थापनं कृत्वा प्राणायामं विधाय
संकल्पः अद्येहदेशकालौ संकीर्त्य अमुकगोत्रोऽमुकरा
शिरमुकशर्म्माहं करिष्यमाणकन्यादानप्रतिग्रहार्थं द्वा
र देशागतस्य वरस्य पूजनपूर्वकं वरणं करिष्ये तस्य पूर्वा
गत्वेन वरकन्ययोः पाणिग्रहणकर्म्मणि आचार्यकर्म्म रामः ४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्त्तुमाचार्य्यस्यपूजनंवरणंचकरिष्ये इतिसंकल्पः मू
मिर्द्वायजन्मासित्वंविप्रपुरुषोत्तम प्रत्यक्षोयज्ञपुरुष
अर्घंमेप्रतिगृह्यतां इतिमंत्रेणाचार्य्यायार्घंदत्वा गंधा
क्षतपुष्पैःसंपूज्य एभिर्गंधाक्षतपुष्पमालायज्ञोपवीतपुंगी
फलद्रव्यवासोभिरेकरणोःवरकन्ययोःकरिष्यमाणविवाह
कर्म्मणिआचार्य्यकर्म्मकर्त्तुमाचार्य्यत्वेनत्वामहंवृणे
वृतोस्मीतिप्रत्युक्तिः ततआचार्य्यायऽर्घंदद्यात ॐअ
र्घोऽर्घोऽर्घःप्रतिगृह्यतां इत्यर्घंदद्यात ततआचार्यप्रमु
खाःपठंति ॐअथवरेंद्राणीतेवत्सवद्धैदेवाएतयग्रहस्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ ५

होमेप्रशंसंतितेतस्माद्धरंहरणीते अथवारात्यउपानहा
उपमुंचतेसग्नोहवेदेवाघृतकुंभेप्रवेशयांचक्रुः ततोवरा
हसंबभूव तस्माद्वाराहामेदुरोघृतांद्यीसंबभूव तस्माद्वा
राहगावःसंजनतेस्वमेवैतद्रसमाभिसंजनते तत्पारंनी
यतेप्रतिष्ठति तस्माद्वाराह्याउपानहाउपमुंचतेसत्राज
गामगौतमोबभूववाराणस्यजैवलेरासतस्माद्वासनमाहार्घ्यो
दकमहारयांचकारायास्माकमर्घंचकार सहोवाचवरंव
र्दीति गौतमायदध्रुहीतिसहोवाचमातिद्वायते मयैषप्र राम
तियांतुकुमारस्यातेवाचमभाषततंतांमेब्रूहीतिसहोवाच

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विज्ञायतेहास्तिहिरण्यपस्यपात्रं गोश्वानोदासदासीनांय
शिवाराणोपरिधानानांमातोमहान्यर्थ्यंनपस्यामवधान्योऽ
यासर्व्वंसवैगोत्तमतीर्थेनेक्षामहत्युपद्रंहं भवंतमित्विा
चाहमस्मैपूर्वमुपनयंतिसहोपायनकीर्त्या उवाचवाचा
सुवाचः इतिपठित्वा आगतोसिवरश्रेष्ठधर्मकामार्थसि
द्धये प्रतिग्रहसमर्थोसि॰ अर्घंगृह्णनमोऽस्तुते आपः
क्षीरंकुशाग्राणिदध्याविरततंडुलैः यवैःसिद्धार्थकैश्चै
वअष्टांगोर्घःप्रकीर्तितः ॐ अर्घोऽर्घोऽर्घःप्रतिगृह्यतां
वरःप्रतिगृह्णामि॰ इतिप्रतिगृह्य ॐ असोयस्ताम्त्रोऽरुण

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ उतवम्भूस्तमंगलं येचैनᳫं रुद्रा अभितोदिक्षुश्रिताःसह
६ स्रशोवैषाᳫं हेडईमहे ॐ असौयोवसर्पतिनीलग्रीवोवि
लोहित उतैनंगोपा अदृश्रनदृश्रन्नुदहार्य्य सदृष्टोम्रड
यातिनः २ नाभौहस्तेप्रदातव्यंस्कंधेशिरसिपादयोः जा
नुभ्यामुदरेचैवमष्टांगोर्घःप्रकीर्तितः अष्टांगेर्घंदत्वा गंध
द्वाराभितिगंधं नमोस्त्वनंतायेति अक्षतपुष्पैर्वरंसंपूज्य
वरांसामयींगृहीत्वा एभिर्गंधाक्षतपुष्पद्रव्ययज्ञोपवीत
पुष्पमालाकेचुकोष्णीयादिवासःकर्णाभूषणाकरभूषणा
दिभिः अनयावरमुद्रिकयाचकन्यादानंप्रतिग्रहार्थं अमु रामः ६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कगोत्रं अमुकप्रवरं अमुकवेदशाखाध्यायिनं अमुकशर्माणं
वरत्वेन त्वामहं वृणे वृतोस्मीति वरो वदेत् ततो वरणाय यज्ञोप
वीत पूर्वक मालाकर्णाभूषण वस्त्रमुद्रिकाधारणं कृत्वा अभि
षेकं तिलकं च कृत्वा मंत्रपाठः ॐ अग्नये त्वा मह्यं वरुणो
ददातु सोमृतत्वमशीय प्राणो दात्रेयधिमह्यं प्रतिग्रहीत्रे
रुद्राय त्वा मह्यं वरुणो ददातु सोमृतत्वमशीयायुर्दात्रेय
धिमयोमह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा मह्यं वरुणो ददा
तु सोमृतत्वमशीय त्वग्दात्रेयधिमयोमह्यं प्रतिग्रहीत्रे
यमाय त्वा मह्यं वरुणो ददातु सोमममृतत्वमशीयहयोदा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.प. ७

त्रेयधिमयोमह्यंप्रतिगृहीत्रे यमायत्वामह्यंवरुणोद
दातुसोमृतत्वमशीयहयोदात्रेयधिमयोमह्यंप्रतिगृही
त्रे ॐकोदात्कस्मात्रदात्कामोदात्कामायादात्कामोदा
ताकामःप्रतिगृहीताकामैतत्ते इतिमंत्रपाठंकृत्वा कन्या
पित्रेदद्यात् ततोवस्त्रादिभिर्वानीराजनंकुर्यात् इतिदे
शाचारः इतिकृत्यर्घविधिः ततोवाद्यपुरस्सरंस्वस्तिवा
चनंपठन् विवाहशालायांगच्छेत् प्रथमाचार्य्यवरयोस्ति
लकंविधाय ततःप्राङ्मुखंवरंपश्चिमाभिमुखींकन्यांस्वयं
दाताउदङ्मुखोभूत्वा सर्वांविवाहसामग्रींयथास्थानमा

राम: ७

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri
साद्यरक्तकंवलादीमरतरपटं कृत्वा शुभासनेउपविश्यप्रा
चम्य अर्घस्थापनंकृत्वा प्राणायामंविधाय संकल्पः अ
घेहेत्यादिदेशकालौसंकीर्त्यः मुकगोत्रोमुकराशिरमुकश
र्म्माहंकन्यादानप्रतियहार्थंगृहागतंस्नातकंवरं मधुपर्केणा
र्चयिष्ये यथावरोपिअर्घस्थापनंविधायसंकल्पंकुर्य्यात्
अद्येहामुकराशिरमुकशर्म्माहंधर्म्मप्रजाद्यर्थयजुःशा
खोक्तविधिनाविवाहकर्म्माहंकरिष्ये इतिसंकल्पः मधुप
र्कविधिस्तुवरशाखोक्तःकार्य्यः तत्रपारास्करसूत्रम् षड
र्घ्याभवंत्याचार्य्यऋत्विक्वैवाह्योराजाप्रियस्नातकइति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिसंवत्सरानर्हयेयुः अथयजमानः पीठमासनमाहार्य्या
वि.प. ह साधुभवानास्तामर्चयिष्यामो भवं तमर्चयेतिवरस्यो
८ क्तिः पाद्यादारभ्याशिरःप्रतिगृह्यतां वरःप्रतिगृह्णामीत्युक्त्वा
एके विष्टरमादायाह वर्ष्मोस्मीत्याथर्वणऋषिरनुष्टुप्छंदः
विष्टरो देवता उपवेशने विनियोग ॐ वर्ष्मोस्मि समानानामु
द्यतामिवसूर्य्यः इमंतमभितिष्ठामि यो मा कश्चाभिदा
सति इति मंत्रं पठित्वा विष्टर उपविशति ततः पाद्यं३
प्रतिगृह्यतां अहंप्रतिगृह्णामीति वरःप्रतिगृह्य तत्पात्रं रामः
भूमौ निधाय अंजलिना जलमादाय दक्षिणं पादं प्रक्षाल

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यति मंत्रः विराजोदोह इति प्रजापतिर्ऋषिर्यजुश्छंदः आपो देवता दक्षिणपादप्रक्षालने विनियोगः ॐ विराजोदोहमसि विराजोदोहमसीय मयिपाद्यविराजोदोहमसि अनेनवामपादं प्रक्षालयेत् क्षत्रियादीनां वामपादं प्रथमे ततो द्वितीयविष्टरं कलशद्रव्यं दत्वाद्द्यात् संकल्पः अद्येह अमुकशर्माहं आदित्यादिनवग्रहाणां प्रीतये इदं सुवर्णादिकलशद्रव्यं कन्यापक्षीयब्राह्मणाय दास्ये तत्सत् इति द्रव्यं दत्वा द्वितीयं विष्टरं द्यात् विष्टरो प्रतिगृह्यतां अहं प्रतिगृह्णामि पूर्ववद्वर्ष्मोस्मीति मंत्रं पठित्वोपविशयेत् पादयोरधस्तात्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निदध्यात् ततोयजमानः अर्घोऽर्घोऽर्घः प्रतिगृह्यतांवरः
प्रतिगृह्णामीतिप्रतिगृह्य· मंत्रः आपस्थेतिप्रजापतिर्ऋषि
र्यजुश्छंदः आपोदेवता अर्घग्रहणे विनियोगः ॐआपस्थयु
ष्माभिः सर्वान्कामानवाप्नुवानितिमंत्रंपठित्वा अर्घम
भिमंत्रयेत् समुद्रमित्यथर्वणऋषिरनुष्टुप्छंदः आपोदे
वताऽर्घाभिमंत्रणेविनियोगः ॐसमुद्रंवःप्रहिणोमिस्वां
योनिमभिगच्छत अरिष्टास्माकंवीरामापरासेचमत्पयः इति
अथाचमनीयं३ प्रतिगृह्यतां इत्युक्तवरःप्रतिगृह्णामीत्यु
क्त्वाऽऽचमनंकुर्यात् मंत्रः आमागन्नितिपरमेष्ठीऋषिर्बृह

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यातिश्छंदः आपोदेवताचमनेविनियोगः ॐ आमागमन्य
शासंसृजवर्चसातमाकुरुप्रियंप्रजानामधिपतिंपशू
नामरिष्टंतनूनां इतिमंत्रेणसकृदाचम्य स्मार्त्ताचमनंकु
र्य्यात् अथदधिमधुघृतंकांस्येस्थापितंकांस्यपात्रेणपि
हितंमधुपर्कंवरायनिवेदयेत् ॐमधुपर्कोमधुपर्कोमधुप
र्कः प्रतिगृह्यतां वरः अहंप्रतिगृह्णामीत्युक्त्वायजमानह
स्ताद्धृतंमधुपर्कमीक्षमाणोमंत्रंपठेत् मित्रस्यत्वेतिबृ
हस्पतिऋषिर्यजुःछंदोमधुपर्कोदेवताप्रेक्षणेविनियोगः
ॐ मित्रस्यत्वाचक्षुषासर्वाणिभूतानिसमीक्षंतां मित्रस्यत्वा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चक्षुषासर्वाणिभूतानिसमीक्ष्येमित्रस्यत्वाचक्षुषासर्वा
वि.प. णिभूतानिसमीक्षामहे इतिसमीक्ष्य देवस्यत्वेतिबृहस्पति
१० रांगिरसोऋषिर्यजुश्छंदःसवितादेवतामधुपर्कग्रहणेवि
नियोगः ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो
हस्ताभ्यांप्रतिगृह्णामि इतिप्रतिगृह्य सव्यपाणौनिधाय
दक्षिणस्यानामिकयात्रिःप्रयौतित्रिवारंमिश्रयति मंत्रः
नमःश्यावेतिप्रजापतिऋषिर्यजुःछंदःसवितादेवताम
धुपर्कनिरूक्षणेविनियोगः ॐनमःश्यावाश्यायान्नश
नेयत्तआविद्धंतत्तेनिष्कृंतामि इतिसकृदालोड्य त्र्यंगु रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्ठानामिकाभ्यां त्रिवारं निरूक्षणं कृत्वा त्रिःप्राश्नाति यन्म
धुन इति कुत्स ऋषिर्जगती छंदो मधुपर्को देवता प्राशने वि
नियोगः ॐ यन्मधुनो मधव्यं परमं रूपमनाद्यं तेनाहं म
धुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादो स
नीति इति मंत्रेण द्विवारं मधुपर्कप्राशनं मधुवाता ऋतायत
इ ऋचा वापि प्राशनं कृत्वा शेषं पुत्राशिष्याय वोत्तरतत्रासी
नायुवोच्छिष्टं दद्यात् सर्वं वा प्राश्नीयात् असंचरे वा प्रक्षिपे
त् आचम्य प्राणान्संस्पृशेत् संहताभिस्तिसृभिस्तर्ज्ज्ञनी
मध्यमानामिकाभ्यां ॐ वाङ्मे आस्येस्त्वीति नासिकारंध्रे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ ११

अंगुष्ठप्रदेशनीभ्यां अनामिकाभ्यां अक्ष्णोर्मे चक्षुरस्त्वी
ति चक्षुषी कर्णयोर्मे श्रोत्रमस्त्विति कर्णौ बाह्वोर्मे बल
मस्त्विति युगपद्बाहू ऊर्वो मे ओजोस्त्विति ऊर्वोः अरिष्टा
नि मेंगानि संतु तनूस्तन्वा मे सहेति शिरः प्रभृति पादांतं
आलभेत ततो द्विराचमनं कृत्वा यजमानः खड्गमादाय
गौः गौ गौरिति त्रिराह तालभ्यतामिति वदेत मातेति ब्रह्मा
ऋषिर्यजुश्छंदो गौर्देवता गोरभिमंत्रणे विनियोगः ॐमा
ता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः
प्रणवोचं चिकितुषे जनाय मागामनागामदितिं मावधिष्ट

रा॰म॰ ११

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ममचामुष्य ब्राम्मणायजमानस्यचोभयोःपाप्मानंहत
उत्सृजततृणान्यत्तु इतिपठित्वा कुशपत्रस्योत्सर्गएवंना
लंभनंचोटनेनकुर्यात् गोरालंभनमितितद्दक्षिणासंक
ल्पः अद्येहामुकशर्म्माहंमधुपर्कोत्सर्ज्जनकर्म्मणःसाङ्ग
तापार्थंइमांदक्षिणामाचार्य्यायदास्ये उभयपक्षाद्दक्षिणा
संकल्पंदद्यात् अस्मिन्नवत्सरेवरपक्षीयःकश्चिद्ब्राह्मणो
वहिःशालायांमागत्यवेदींकृत्वा पंचभूसंस्कारपूर्वकम
ग्निंसंस्थापयेत् अग्निस्थापनानंतरंकन्यावस्त्रपरिधान
मंत्रः जरांगच्छेतिप्रजापतिर्ऋषिस्त्रिष्टुपछंदःवासोदेव

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताकन्यावस्त्रपरिधानेविनियोगः ॐजरांगच्छपरिधत्स्व
वि.प. वासोभवाकृष्टीनामभिशस्तिपावाशतंचजीवाशरदः
१२ पुरूचीरायस्पोषमभिसंव्ययस्वायुष्मतीदंपरिधत्स्ववा
सः याअकृंतन्नितिप्रजापतिऋषिस्त्रिष्टुप्छंदोवासो
देवताउत्तरीयपरिधानेविनियोगः याअकृंतन्नवयंया
तन्वतयाश्चदेविस्तन्तूंजभीतोततथताःस्त्वादेविजरसेसंव्य
यस्वायुष्मतीदंपरिधत्स्ववासः अथवरःस्वयंपरिधत्तेप
रिधास्यैतिअथर्वणऋषिःपंक्तिछंदःवासोदेवतावस्त्रप राम:
रिधानेविनियोगः ॐपरिधास्यैयशोधास्यैदीर्घायुत्वाय १२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रद्दष्टिरद्दष्टिरश्मिः शतं चजीवाभिशरदः सुवर्च्चारायस्पो
षमभिसंव्ययिष्ये अथोत्तरीयं ॐयशसामाद्यावापृथि
वीयशसेंद्राय बृहस्पातिर्यशोभगश्च माविंद्याद्यशोमाप्र
तिपद्यतां ततआचम्य अथकन्यापितापरस्परं समंजे
थामितिकन्यावरौसन्मुखीकुर्य्यात ॐसमजंतुविश्वेदे
वासमापोहृदयानिनौसंमातरिश्वासंधातासमुदेष्टीद
धातुनौ इतिपठित्वा अथवंशगोत्रप्रवरनिश्चयार्थंगो
त्रोच्चारः कर्त्तव्यः तत्रक्रममाह कारिकाकारः उच्चारः प्राति
लोमेनपितृणांसर्वकर्म्मसुकन्यादानेनयज्ञेचावत

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ १२

लोमेनसंस्मृतः तत्रपूर्वकन्यापत्नियोब्राह्मणआशीर्वाद
श्लोकंपठेत् जेतुंयस्त्रिपुरंहरेणहरिणाव्याजाद्बलिंब
ध्नतास्त्रष्टुंवारिभवोद्भवेनभुवनंशेषेणधर्त्तुंधरां पार्व
त्यामहिषासुरप्रमथनेसिद्धादिभिर्मुक्तये ध्यातःपंचशरे
णविश्वविजयेनागाननःपातुवः तत्रेत्थंवाक्यं किंगो
त्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्म
णःप्रपौत्राय किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवे
दाध्यायिनःकिंशर्म्मणःपौत्राय किंगोत्रस्यकिंप्रवर रा॰म॰ १३
स्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्मणःपुत्राय श्री

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृष्मतेकन्यार्थिने विष्णुस्वरूपिणे किंनाम्नेवराय अथ
वरपक्षीयोब्राह्मणोपठेत मातस्तातजटासुकिंसुरसरि
त्किंशेषेचंद्रमाभालेकिंदुतमुक्तलुठत्परीसर्किंनागाधि
पःकिंकटौ कृत्तिःकिंजघनद्वयांतरगतंकिंदीर्घमालंवतं
कृत्वापुत्रवचोविकास्मितमुखीलज्जाननापातुवः २ अ
मुकगोत्रस्य अमुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्या
यिनः अमुकशर्म्मणःप्रपोत्राय अमुकगोत्रस्य अमुक
प्रवरस्य अमुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्म्म
णःपौत्राय अमुकगोत्रादेरमुकशर्म्मणःपुत्राय अमुक

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ २४

नाम्नेविष्णुस्वरूपिणेकन्यार्थिनेवराय किंगोत्रस्य
किंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनःकिंशर्म्मणः
प्रपौत्री किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्या
यिनःकिंशर्म्मणःपौत्री किंगोत्रस्यकिंप्रवरस्यकिंशाखि
नःकिंवेदाध्यायिनःकिंशर्म्मणःपुत्री आयुष्मतीवरार्थि
नीश्रीरूपिणीकिंनाम्नीकन्या कन्यापक्षीयःपठेत जान
क्याःकमलायताञ्जलिपुटेयापद्मरागायतान्यस्ताराघ
वमस्तकेपरिलसत्कुंदप्रसूनायता स्वस्ताश्यामलकाय
कांतिनिकरेयास्त्रिंद्रनीलायतामुक्तास्तासफलाभवंतु

रा॰मः २४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतां श्रीरामवैवाहिकाः ३ अमुकगोत्रस्यऽमुकप्रवरस्य
ऽमुकशाखिनःऽमुकवेदाध्यायिनःऽमुकशर्म्मणः प्रपौ
त्रीऽमुकगोत्रस्यऽमुकप्रवरस्यऽमुकशाखिनोऽमुकवेदाध्या
यिनोऽमुकशर्म्मणः पौत्री अमुकगोत्रस्यामुकशाखिनोऽ
मुकप्रवरस्यामुकवेदाध्यायिनोमुकशर्म्मणःपुत्री आयु
ष्मती वरार्थिनी श्रीरूपिणी अमुकनाम्नीकन्यां किंगोत्र
स्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः किंशर्म्मणः
प्रपौत्राय किंशर्म्मणः पौत्राय किंशर्म्मणः पुत्राय आयुष्म
ते श्रीरूपिणीकन्यार्थिनेऽमुकनाम्नेवरायवरपक्षीयः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ १५

पदैतत्र रासोल्लासभेरणाविभ्रमभ्रतामाभीरवामभ्रुवा
मभ्यर्णपरिरम्भनिर्भरमुरःप्रेमोधयाराधया साधुलद्वदनं
सुधामयमितिव्याहृत्यगीतस्तुतिव्याजाल्लिंगनचुंबिताः
स्मितमनोहारीहरिःपातुवः अमुकगोत्रस्यामुकप्रवरस्या
मुकशाखिनोऽमुकवेदाध्यायिनःऽमुकशर्म्मणःप्रपौत्रा
य॰ऽमुकगो॰ऽमु॰प्रव॰ऽमु॰शा॰ऽमुकवे॰ऽमुकशर्म्मणःपौ
त्राय ऽमुकगोत्र॰ ऽमुकप्रव॰ ऽमुकशा॰ऽमुकवे॰ ऽमुकश
र्म्मणः पुत्रायकन्यार्थिनेविष्णुस्वरूपिणेऽमुकनाम्नेवरा रा॰म॰
य॰ किंगोत्रस्यकिंप्रवरस्यकिंशाखिनःकिंवेदाध्यायिनः १५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किंशर्म्मणः प्रपौत्री किंगोत्रस्य किंप्रवरस्य किंशाखिनः
किंवेदाध्यायिनः किंशर्म्मणः पौत्री किंगोत्रस्य किंप्रवर
स्य किंशाखिनः किंवेदाध्यायिनः किंशर्म्मणः पुत्री वरार्थि
नी श्री रूपिणी किंनाम्नी कन्या एवंक्रमेण त्रिवारं पक्षद्वये
गोत्रोच्चारं कृत्वा पक्षद्वये आशीर्वादश्लोकोपठेत् संनंदे
नं द्विहस्ताहतमुरजरवाहूतकौमारवर्हिंत्रासान्नासाग्ररं
ध्रं विंशति फणिपतौ भोगसंकोचभाजि गंडोड्डीनालि
मालामुखरितककुभस्तांडवेशूलपाणेर्वैनायिक्यश्चि
रं वो वदनविधुतयः पान्तु चीत्कारवत्यः ५ देवक्योयस्य

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ १६

त्तिस्त्रिभुवनविदितास्तु किम्मणीधर्म्मपत्नीपुत्राः प्रद्युम्नमु
ख्याःसुरनरजोधिनोवाहनःपक्षिराजः द्वंद्वारएपोविहारोव्र
जपुरवनितावल्लभाराधिकाद्याश्चक्रे विख्यातमख्येसज्जय
त्तिजगतांस्वस्त्ययेनंदसूनुः ६ कोशल्याजठरालवालज
नितसीतालतालिंगितःसिक्तेपांक्तिरथेनसोदरमहाशा
खाभिसेवर्द्धितः रक्षस्त्रीव्रनिदाघपाटनपटुःछायाचित्ता
नेदह्रुद्युष्माकंसविभूतयेऽस्तुभगवान्श्रीरामकल्पद्रुमः
७ इत्याशीर्वादश्लोकान्पठित्वा कन्यापितादद्यानि ३
त्रिवारंवदेत ततःशाखोच्चारदक्षिणांसंकल्पः व्रद्येहेत्या

रा॰म॰ १६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दि अमुकशर्मा अहं कन्यादानांगगोत्रोच्चारकर्मणः सांगफ
लप्राप्तये साद्गुण्यार्थं इमां दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये
तमितर दक्षिणां दत्वा ततो लग्ने समागते कन्यां वस्त्रभूषणा
दिभिर्भूषयित्वा गंधाक्षतपुष्पैः पूजयेत् तत्र मंत्राः श्रीश्चते
लक्ष्मी० अंबे अंबिके० समखे वा देव्या धियेति मंत्रैः संपूज्य लग्न
स्नानसंकल्पं कन्यापिता वरपिता च कुर्यात् स्वयं सुवर्णा
दिद्रव्यं संप्रोक्ष्य संपूज्य अद्येह इत्यादि अमुकोऽहं अमु
कराशेः कन्यायाः पुत्रस्य च पाणिग्रहण लग्नात् य
च्चतुर्थस्थिता नामादित्यादि नवग्रहाणां दुष्टस्थानां

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰ प॰
७

दुष्टफलोपशान्त्यर्थं शुभानां ग्रहाणां शुभफलप्रा
प्त्यर्थं नवग्रहाणां प्रीतये इमां सुवर्णादिदक्षिणां ब्राह्म
णाभ्यो दद्ये तत्सत् इति दक्षिणां दत्वा अथ कन्यापिता ति
लकुशयवजलान्यादाय उदङ्मुखः सपत्नीकः कन्यापि
ता प्राङ्मुखोपविष्टायाः कन्याया दक्षिणहस्तांगुष्ठं गृही

कन्यांगुष्ठं शंखसहितं गृहीत्वा

त्वा कन्यादानसंकल्पं कुर्यात स्त्रीचदानपर्यंतं तत जल
धारां दद्यात अथ संकल्पः ॐ विष्णु २ र्नमः परमात्मने श्री
पुराणपुरुषोत्तमाय तत्सत् श्रीहंसस्वाधिष्ठानंदस्वरूपिणो रामः
ब्रह्मणः निर्वचमायाशक्तिर्ज्जृम्भिताविद्यायोगकाल ७

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्म्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारत्रितीयाभूतविषयादिपंचकेंद्रियनिर्मितांडकटाहे चतुर्दशलोकात्मके भूलोकलीलयातन्मध्यवर्त्तिभगवतःश्रीनारायणस्योगन्नाभिकमलोद्भूतसकललोकपितामहेनब्रह्मणासृष्टिंकुर्वतातद्वारायप्रजापतिप्रार्थितेनमहापुरुषरूपिणासितवराहावतारेणध्रियमाणायामस्योभूर्लोकसंज्ञतायोधरित्र्यांसप्तद्वीपमंडितायांक्षीराद्यब्धिद्विगुणद्वीपवलयीकृतलक्षयोजनविस्तीर्णजंबूद्वीपेस्वर्गस्थितामरशासितावतारगंगास्रिसरज्झ्रुपावितेभरतखंडेनारिकिलजयावनेशौनकादिमुनिकृतनिवासने

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰
१८

मिथ्यारोपे आर्य्यावर्त्तेपुरापक्षेत्रे हिमवत्तत्पर्वतैकदेशे श्रीभ
गवतो मार्त्तंडस्य पापत्रकालत्रितयज्ञगर्गवराहाचार्य्यादि
गणितायां परार्द्धद्विसंख्यायां ब्रह्मणो द्वितीयपरार्द्धस्य द्विती
ययामे तृतीयमुहूर्त्ते श्रीश्वेतवराहनाम्नि प्रथमकल्पे स्वायं
भुवस्वारोचिषोत्तमतामसरैवतचाक्षुषाख्यमनुनामति
क्रम्यमाणे सप्तमे वैवस्वतमन्वंतरेऽष्टाविंशतिकलि
युगस्य प्रथमचरणे श्रीमन्नृपतिविक्रमार्कसमयातीतसं
वत्सराणां समये नातिक्रांतानां षष्ट्यब्दानां मध्येऽमुक रामः
नाम संवत्सरेऽमुकायनेऽमुकऋतौ अमुकमासेऽमुक १८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पक्षे ऽमुकतिथौ ऽमुकवासरे ऽमुकनामनक्षत्रे ऽमुकयोगे
ऽमुकमुहूर्त्ते ऽमुकस्थे सूर्य्ये ऽमुकस्थे चंद्रे ऽमुकस्थे भौमे ऽमु
कस्थे बुधे ऽमुकस्थे देवगुरौ ऽमुकस्थे शुक्रे ऽमुकस्थे शनौ ऽमु
कस्थे राहौ ऽमुककेतौ एवं गुणाविशिष्टायां अस्यां पुण्यतिथौ
ऽमुकगोत्रो ऽमुकशर्माहं सपत्नीकोहं अमुकगोत्रस्य ऽमुक
प्रवरस्य ऽमुकशाखिनो ऽमुकवेदाध्यायिनः अमुकशर्म्मणः
प्रपौत्राय अमुकशर्म्मणः पौत्राय ऽमुकशर्म्मणः पुत्राय आयु
ष्मते कन्यार्थिने विष्णुस्वरूपिणे ऽमुकनाम्ने वराय ऽमुकगो
त्रस्य ऽमुकप्रवरस्य ऽमुकशाखिनो ऽमुकवेदाध्यायिनः ऽमुक

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ २९

शर्म्मणः प्रपौत्री ऽमुकशर्म्मणः पौत्री ऽमुकशर्म्मणः पु
त्री मम श्रीरूपिणीं वरार्थिनीं इमां कन्यां यथाशक्त्यलंकृतां
यथाशक्तियौतकयुतां प्रजापतिदैवत्यां पुराणोक्तशतगुणी
कृतज्योतिष्टोमादिसत्रसमफलप्राप्तिकामः ममसमस्तपितॄ
णां निरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानविधि
त्रकार्प्पासकौशेयनूतनस्वर्णसूत्रांचितानि नानादिग्दे
शजातानि वस्त्रक्रयक्रीतानि बहुमौल्यानि दुकूलोत्तरीयकं
चुकादीनि प्यादिकोसुपात्रोपरि मंत्रः ओं यदस्याय वासस्त्व
णाधिवासं हिरण्यान्यस्मै संदानं शर्म्मयद्धीशं प्रियादेवेष्वाय णम्: २९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मयेतिभूषणानिसंस्थाप्य मणिमौक्तिकहीरकगारुत्मक
मरकतपुष्परागनीलमहानीलेंद्रवैडूर्यादिमहार्घविवि
धोपलशोभितस्वर्णरचितकरकंकणनूपुरपादांगुलिककोर्मि
रहारग्रैवेयनाशिकेयतिलकटंकस्वर्णपुष्पकंकणकर्णाग
ुलीयककिरीटशिरःपुष्पादीनिविविधस्वर्णमेखलापटुक्ष
त्रयाधितानिनानाभूषणानियादेवतीपुत्रवती मंत्रः रू
पणवोरूपमभ्यागंतुंयोवोविश्वेदेवाविभक्तः तस्ययथाप्र
तरचंडदक्षिणाविश्वपशपर्यंतरिक्षंयतस्वसदस्य ॐस्वर्णधु
र्म्मस्वाहा ॐ स्वर्णा॰र्कःस्वाहा ॐ स्वर्णशुक्रःस्वाहा स्वर्ण

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.प. २०

ज्योतिःस्वाहा स्वर्णसूर्य्यःस्वाहा यथाशक्तियौतकादिदा
नंदद्यात् ततःकन्यापिताभूयसीदक्षिणासंकल्पंकुर्य्यात्
अद्येहेत्यादिअमुकशर्म्मासपत्नी[illegible] कोहंश्रीलक्ष्मीनारा
यणप्रीतयेकन्यादानकर्म्मणःसांगफलप्राप्तयेसादुगुणार्थ
मिमांभूयसींदक्षिणांनानागोत्रेभ्योदीनानाथेभ्यश्चविभज्य
दास्येतत्सन्नमम तथायथोपपन्नेनान्नेनब्राह्मणांश्चभो
जयिष्ये इतिसंकल्प्यदक्षिणांदत्वा अभिषेकमंत्रपाठादि
कुर्य्यात् ततःसुवासिनीभिःपुरंध्रीभिःसम्यक्शृंगारादिना राम: २०
कन्याभूषयित्वा वरपिताप्रदत्तांकन्यामादायप्रतिग्रहस्था

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नान्निष्क्रामयति मंत्रः यदेवीत्याथर्वणाऋषिस्त्रिष्टुप्छं
दोलिंगोक्तादेवताकन्यानिष्क्रमणेविनियोगः ॐयदेषिम
नसाहूरं अथयौतकदानवाक्यानि प्रथमंसप्यायाः अभू
न्यंशयनंनित्यमन्नतंनोश्रियमुन्नति सौभाग्यंदेहिमेनित्यं
शय्यादानेनकेशवः अथसुवर्णांगुलीयकस्य हिरण्यग
र्भसंभूतंपवित्रंचांगुलीयकं सर्वप्रदंप्रदास्यामिप्रीणातुक
मलापतिः कुंडलयोः क्षीरोदमथनाद्देवैरुद्धृतंकुंडलद्वयं
श्रियासहसमुद्भूतंदेहश्रीःप्रीयतामिति ताम्रपात्रस्य पराप
वादपैशून्यादभक्ष्यस्यचभक्षणात् उत्पन्नंताम्रदानेनपापं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ २२

नश्यपतितत्स्मरणात् कांस्यपात्र्याः यानिपापानिकाम्या
निकामोत्यपतिकृतानिचकांस्यपात्रप्रदानेनतानिनश्यंतु
मेसदा अथान्यानि गोमहिष्यादीनि यौतकत्वेनदेयानि
दिशोनुपविमानो हिरण्यपपर्णो वैकर्णः सत्यामनसाकरोतु
असौ अमुकीलक्ष्मीतिसंबुध्य तत्कन्यानामग्रहणांति अ
थकन्यापितावरायएनांकन्यांसमीक्षेथामितिप्रैषंदत्वा
वरः समीक्ष्यमाणांकन्यांहृष्ट्वा मंत्रानपठेत् अघोरचक्षुरि
त्यादिचतुर्णांमंत्राणांप्रजापतिऋषिस्त्रिष्टुप्छंदःकुमारी रा॰म॰ २२
देवतापरस्परसमीक्षणेविनियोगः ॐअघोरचक्षुःपतिघ्नी

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिवायपशुभ्यः सुमनाः सुवर्च्चा वीरसूर्देवकामास्योनाशंनोभ
वद्विपदेशंचतुष्पदे ॐसोमः प्रथमो विविदे गंधर्वो विविद उत्तरः
तृतीयोऽग्निस्तेपतिस्तुरीयस्ते मनुष्यजाः ॐसोमोऽददद्गंधर्वाय गं
धर्वो विविददग्नये रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमाम् २ सा
नः पूषाशिवतमामैरयसानऊशतीविहरयस्यामुशंतः प्रहराम
शेफं यस्यामुकामावहवोनिविष्ट्यै ४ इतिमंत्राननुपठित्वा कन्या
निष्क्रमणसमये एकस्मै ब्राह्मणाय जलपूर्णकुंभं दत्वा स्कं
धेधृत्वा मौनेनाभिषेकपर्य्यंतमेशान्यामुदङ्गितिष्ठेत् अथवरः
शालायामागत्याग्नेः पश्चात्तेजनीकटं वादक्षिणपादेन प्रवृत्तो

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कि.प.
२२

ल्वं अग्रदक्षिणामग्निं परीत्य कन्यावरस्य दक्षिणतः उपविश
ति ततः सर्वां विवाहसामग्रीं संपाद्य आचम्य अर्घ्यं स्थाप्य
प्राणायामं कृत्वा वरः प्रधानसंकल्पं कुर्यात् अद्येह देशका
लौ संकीर्त्य· अमुकगोत्रोऽमुकराशिरमुकशर्म्माहं श्रुतिस्मृ
तिपुराणोक्तफलप्राप्तये ब्रह्मविधिना पितृदत्तामिमां गौरीक
न्यां विवाहयिष्ये तत्पूर्वांगत्वेन विवाहकर्म्मणि ब्रह्मकर्म्म
कर्त्तुं ब्राह्मणपूजनं वरणं करिष्ये इति ब्रह्मणेऽर्घ्यं दत्वा· गं
धाक्षतपुष्पैः संपूज्य· एभिर्गंधाक्षतपुष्पपुंगीफलद्रव्यवासो रामः
लंकरणादिभिर्वरकन्ययोर्विवाहकर्म्मणि ब्रह्मकर्म्मकर्त्तुं ब्र २२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्त्वेनत्वामहंवृणे वृतोस्मीतिप्रत्युक्तिः यथाचतुर्मुखो
ब्रह्मेतिपठित्वाएवमुत्तरासने [illegible] वृतोब्रह्मापूर्वकल्पित
दक्षिणासने उपविशेत् ततोब्रह्मोपवेशनादिपर्युक्षणां
तेकर्म्मकुर्य्यात् प्रणीताप्रोक्षणपात्रासादनांतेविशेषकल्प
नीयानिवस्तूनी आसादयेत् शमीपालाशमिश्रालाजाः अ
श्मानमखंडलोहितमानुडुहंचर्म्मतदभावेरक्तवस्त्रं कुमा
रीभ्रातासूर्पंनवीनंआचार्य्यःवरद्वयंततःपर्युक्षणांतेकर्म्म
कृत्वा वरोदेवताभिध्यानंकुर्य्यात् अद्यविवाहकर्म्मणाहं
यक्ष्ये तत्रप्रजापतिमिंद्रमग्निंसोममग्निंवायुंसूर्य्यमग्निंवं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुणोसवितारंविष्णुंविश्वान्मरुतःस्वर्कान् वरुणादितिंप्र
वि॰प॰ २३ जापतिं ऋताषाडृतधामानमग्निंगंधर्वमोषधीशाप्स
रसोमुदसंहितसमानंसूर्य्यगंधर्वंमरिच्यप्सरसआयु
र्वसुषम्णंसूर्य्यरश्मिंचंद्रमसंगंधर्वंनक्षत्राण्यप्सरसोभे
कुरीरिषिरंविश्वव्यचसंवातंगंधर्वमप्सरऊर्जोभुज्युंसुप
र्णंयज्ञंगंधर्वंदक्षिणाप्सरसस्तावाप्रजापतिंविश्वकर्म्माणं
नक्तंगंधर्वमृक्सामान्यप्सरसएष्टीचित्तंमाकूतिंविज्ञातंवि
ज्ञातिंमनःशक्करींदर्शपौर्णमासेबृहद्रथंतरंप्रजापतिंवि राम॰ २३
श्वभूतानामधिपतिमिंद्रंपशूनामधिपतिंयमंपृथिव्या

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नामधिपतिंवायुरंतरिक्षस्याधिपतिंसूर्य्यंदिवोधिपतिंचंद्रम
संनक्षत्राणामधिपतिंबृहस्पतिंब्रह्मणोऽधिपतिंमित्रंसत्याना
मधिपतिंवरुणमपामधिपतिंसमुद्रंश्रोतानामधिपतिंसोमंमौ
षधीनामधिपतिंसवितारंप्रसवानामधिपतिंविष्णुंपर्वतानाम
धिपतिंमरुतोगणानामधिपतिंपितॄनपितामहानपरानवरा
परानवरानततानततमुखानाग्निमाग्निंवैवस्वतंमृत्युंचाज्ये
नाहंयक्ष्ये अथकृत्वादेवताभिध्यानंकरोति अर्य्यमणमग्नि
मव्यापरमगमाग्निंसर्वंमणमग्निंमंगलाजैरहंयक्ष्ये ततोवरु
प्रजापतिंस्विष्टकृतंचाज्येनाहंयक्ष्ये इदमाज्यंकृतंतदेवता

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

म्योमयापरित्यक्तं यथादैवतमस्तु तत्तएतंतेतिप्रतिष्ठा ओं
वि॰प॰ २४ भूर्भुवःस्वर्योजकनामाग्नेस्तुप्रतिष्ठितोवरदोभव तदेवाग्नि
रितिचत्वारिशृंगेतिमंत्राभ्यांध्यानावाहनपाद्यादिनीराजना
तंपूजयित्वादक्षिणाजान्वाचब्रह्मणान्वारब्धोमनसाप्रजा
पतिंध्यात्वा ओंप्रजापतयेस्वाहा इदंप्रजापतये ओंमिंद्राय
स्वाहा इदमिंद्राय ओमग्नयेस्वाहा इदमग्नये ओंसोमा
यस्वाहा इदंसोमाय अथमहाव्याहृतिहोमः व्याहृतीनां
प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप् छंदांसि अग्निवायु रामः
सूर्य्योदेवतासर्वप्रायश्चित्तहोमेविनियोगः ॐ भूःस्वाहा २४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदंभूः ॐभुवःस्वाहा इदंभुवः ॐस्वःस्वाहा इदंस्वः ॐ
त्वन्नोअग्ने वरुणस्यविद्वान्॰ ॐसत्वन्नोअग्न इदमग्नि
वरुणाभ्यां अापश्चाग्न इदमग्नये ये तेसत मितिशुनः
शेपऋषिस्त्रिष्टुप्छंदोवरुणसवितृविष्णुविश्वेदेवामरु
तःस्वर्कादेवताःसर्वप्रायश्चित्तहोमेविनियोगः ॐयेतेशत
॰ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः
स्वर्केभ्यः उदुत्तममितिशुनःशेपऋषिस्त्रिष्टुप्छंदोव
रुणोदेवतासर्वप्रायश्चित्तहोमेविनियोगः उदुत्तमंवरुण
पाश॰ इदंवरुणायादित्यै दक्षिणासंकल्पः अद्येहामुक

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शर्म्मासवत्सकोहं सर्वप्रायश्चित्तहोमकर्म्मणः सकुरणा

वि.प. २५ र्थमिमां दक्षिणामाचार्याय ब्रह्मणे च यथांशेन दास्ये

मंत्रपाठः उत्सर्गचतुर्थीयेत्र वरुणो विष्णुना सह तुष्टि

पुष्टिकरो नित्यमुभयोः स्त्रीकुमारयोः अथराष्ट्रभृ

त्प्रयोगो यथा ऋताषाडिति प्रजापतिऋषिः यजुश्छं

दः ऋताषाडृतधामाग्निर्गंधर्वो देवता होमे विनियोगः

ॐ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु

तस्मै स्वाहा वाट्तुभ्यं इदं ऋताषाहे ऋतधाम्ने गंधर्वा राम: २५

य पुनः ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सर

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोमुदोनामताभ्यःस्वाहा इदमोषधीभ्योऽप्सरोभ्योमुद्भ्यः स
ᳬ हित इति प्रजापतिर्ऋषिर्यजुः छन्दः संᳬ हितो विश्वसा
मा सूर्य्यो गंधर्वो देवता होमे विनियोगः ॐ संᳬ हितो विश्व
सामा सूर्य्यो गंधर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्
ताभ्यः इदं संᳬ हिताय विश्वसाम्ने सूर्य्यगंधर्वाय सुतः
संᳬ हित इति प्रजापतिर्ऋषिर्यजुः छन्दः मरीचयोऽप्सरस
आयुवो देवता होमे विनियोगः ॐ संᳬ हितो विश्वसामा
सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा
इदं मरीचयोऽप्सरोभ्य आयुभ्यः देवता होमे विनियोगः ॐ स

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰
२६

थं हितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयो ऽप्सरस आ
युवो नाम ताभ्यः स्वाहा इदं मरीचयो ऽप्सरोभ्य आयुभ्यः सु
षुम्णास्व इति प्रजापतिर्ऋषिर्यजुः छंदः सुषुम्णः सूर्य र
श्मिश्चंद्रमा गंधर्वो देवता होमे विनियोगः सुषुम्णः सूर्य
रश्मिश्चंद्रमा गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्
इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय। पुनः सुषु
म्ण इति प्रजापतिर्ऋषिर्यजुः छंदो नक्षत्राण्यप्सरसो भेकु
रयो देवता होमे विनियोगः ॐ सुषुम्णः सूर्यरश्मिश्चंद्र राम॰ २६
मा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदंनक्षत्रेभ्याप्सरोभ्योभेकुरीभ्यः इषिरइतिप्रजापतिर्ऋषि
र्यजुःछंदः इषिरविश्वव्यचावातोगंधर्वोदेवताहोमेविनि
योगः ॐ इषिरोविश्वव्यचावातोगंधर्वःसनः इदंब्रह्मक्षत्रं
पातुतस्मैस्वाहावाट्ताभ्य इदं इषिरायविश्वव्यचसेवाताय
गंधर्वाय पुनः इषिरइतिप्रजापतिर्ऋषिर्यजुःछंदस्तस्याप्यो
प्सरसऊर्ज्जोदेवताहोमेविनियोगः ॐइषिरोविश्वव्यचावा
तोगंधर्वस्तस्यापोप्सरऊर्ज्जोदेवतानामताभ्यःस्वाहा इदं
चभ्योप्सरोभ्यःऊर्ज्जेभ्यः भुज्युरितिप्रजापतिर्ऋषिःयजुः
छंदोभुज्युसुपर्णोयज्ञोगंधर्वोदेवताहोमेविनियोगः ॐभु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ २७

न्भुरस्तुपर्णो यज्ञो गंधर्वः सनइदं ब्रह्मक्षत्रंपातु तस्मै स्वाहा
वाट् इदं भुज्युवे सुपर्णाय यज्ञाय गंधर्वाय ॐ भुज्युप्रजा
पतिऋषिर्यजुः छंदो दक्षिणाप्सरसो देवताहोमे विनियोगः
ॐ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणाप्सरसस्तावाना
मताभ्यः स्वाहा इदं दक्षिणाप्सरोभ्यस्तावानामताभ्यः प्र
जापतिऋषि यजुःछंदः प्रजापति विश्वकर्मामनोगंधर्वो दे
वताहोमे विनियोगः ॐ प्रजापतिर्विश्वकर्मामनोगंधर्वः
सनइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये वि
श्वकर्मणे मनसे गंधर्वाय ॐ प्रजापतिऋषिर्यजुःछंदः

राम॰ २७

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋत्वक्तामाराप्प प्रारब्धयोदेवताहोमेविनियोगः ॐप्रजा
पतिर्विश्वकर्मामनोगंधर्वस्तस्यऋत्वक्तामाराप्पप्रारब्धयो
देवतानामताभ्यः इदंऋत्वक्सामभ्योप्सरोभ्यप्रष्टिभ्यः
अत्रराष्टभृज्ज्याभ्यातार्भ्यातानमंत्राणांहोमस्यप्रत्येकंफ
लविशेषोक्तेर्विशेषफलमीप्सुन्प्रत्येकदक्षिणांकुर्या
त इतिवदंति तच्छिष्टाचारतोवश्यकर्त्तव्याइतिसंप्रदाय
अथदक्षिणासंकल्पः अद्येहामुकशर्म्मासवधूकोहंकृ
तेतद्राष्टभृड्डोमस्यसांगफलप्राप्तिसाद्गुण्यार्थमिमांद
क्षिणामाचार्य्यब्रह्मभ्यांयथांशेनदास्ये मंत्रपाठः गोविं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दोगोकुलस्यैवगोपीभिश्चहरेस्सहतुष्टिपुष्टिकरोनित्यमुभ
योःस्त्रीकुमारयोः अथजयाहोमः चित्तंचेत्यादीनांत्रयो
दशमंत्राणांपरमेष्ठीऋषिर्यजुःछंदश्चित्तादयोदेवताःप्रति
मंत्रहोमेविनियोगः ॐ चित्तंचस्वाहा इदंचित्ताय ॐचित्ति
श्चस्वाहा इदंचित्त्यै ॐ आकूतंचस्वाहा इदमाकूताय ॐ
आकूतिस्वाहा इदमाकुत्यै ॐविज्ञातंचस्वाहाइदंविज्ञाता
य ॐविज्ञातिश्चस्वाहा इदंविज्ञात्यै ॐमनसेस्वाहा इदं
मनसे ॐशक्करीश्चस्वाहा इदंशक्कर्य्यै ॐदर्शंचस्वाहा
इदंदर्शाय ॐपौर्णमासंचस्वाहा इदंपौर्णमासाय ॐबृ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हं स्वस्वाहा इदंब्रहते ॐरथंतरं चस्वाहा इदंरथंतराय
ॐप्रजापतिजयंतींद्रायधापद्रुयः पृतनाजयेषुतस्मैवि
शः समनंतसर्वाः सऊयसहन्योवभूवस्वाहा इदंप्रजाप
तयेजयायइंद्राय उदकस्पर्शः अथापिदक्षिणा अद्येह
मुकशर्म्मासवधूकोहंचित्तादिहोमस्यसांगफलप्राप्तये
साद्गुण्यार्थं इमांदक्षिणामाचार्य्यायब्रह्मणेयथांशेनद
स्ये मंत्रपाठः चिरंजीवीमहातेजाश्चिरंजीवाश्चदिवौकसः
प्रयच्छंतुवरांवांछामुभयोः स्त्रीकुमारयोः २ अथाभ्याता
होम अग्निर्भूतानामधिपतीत्यादीनोपितरः पितामहा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रिप॰ २९ इत्येतानां सर्वेषां मंत्राणां प्रजापतिर्ऋषिस्त्रिष्टुप् छंदः मंत्रो
क्ता देवताः सर्वा देवताः प्रतिमंत्रं होमे विनियोगः ॐ अग्निर्भूता
नामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्य
स्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा इदमग्न
ये भूतानामधिपतये ॐ इंद्रो ज्येष्ठानामधिपतिः स माव
त्वस्मिन् ब्रह्मण्यस्मिन्॰ इदमिंद्राय ज्येष्ठानामधिपतये ॐ
यमः पृथिव्या अधिपतिः स मावत्वस्मिन्॰ इदं यमाय पृथि
व्या अधिपतये अपउपस्पृश्य हस्त्वा उदकस्पर्शः ॐ वायुरंतरि
क्षस्याधिपतिः स मावत्वस्मिन्॰ इदं वायवे अंतरिक्षस्याधि रामः २९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पतये ओं सूर्यो दिवाधिपतिः समावत्वस्मिन्‌· इदं सूर्याय
दिवाधिपतये ओं चंद्रमा नक्षत्राणामधिपतिः समावत्वस्मि
न्‌· इदं चंद्रमसे नक्षत्राणामधिपतये ओं बृहस्पतये ब्रह्मणो
धिपतिः समावत्वस्मिन्‌· इदं बृहस्पतये ब्रह्मणोधिपतये
ओं मित्रं सत्यानामधिपतिः समावत्वस्मिन्‌· इदं मित्राय सत्या
नामधिपतये ओं वरुणोऽपामधिपतिः समावत्वस्मिन्‌ इदं
वरुणायापामधिपतये ओं समुद्रः स्रोत्यानामधिपतिः स
मावत्वस्मिन्‌ इदं समुद्राय स्रोत्यानामधिपतये ओं अन्नं
साम्राज्यानामधिपतिः समावत्वस्मिन्‌· इदमन्नाय साम्राज्या

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰ प॰ ३० नामधिपतये ॐ सोमो ऽ ओषधीनामधिपतिः स मावत्वस्मि
न् इदं सोमायौषधीनामधिपतये ॐ सविता प्रसवानाम
धिपतिः स मावत्वस्मिन् इदं सवित्रे प्रसवानामधिपतये
ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन् ~~इदं रुद्राय पशूनाम~~
मधिपतिस्व इदं रुद्राय पशूनामधिपतये ॐ त्वष्टा रूपाणा
मधिपतिः स मावत्वस्मिन् इदं त्वष्ट्रे रूपाणामधिपतये ॐ वि
ष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् इदं विष्णवे पर्वताना
मधिपतये ॐ मरुतो गणानामधिपतिः स मावत्वस्मिन् इदं
मरुद्भ्यो गणानामधिपतिभ्यः ॐ पितरः पितामहाः परे तता राम॰ ३०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्ततामहास्ते इह समावत्वस्मिन् इदं पितृभ्यः पितामहेभ्यः
परेभ्योवरेभ्यस्ततभ्यस्ततामहेभ्यः अत्रप्रणीतोदकस्पर्शः अ
त्रापिदक्षिणा अद्येहामुकशर्म्मासवधूकोहं कृतेतदभ्यातान
होमस्यसांगफलप्राप्तिसाद्गुण्यार्थमिमांदक्षिणामाचार्य
ब्रह्मभ्यां यथांशेनदास्ये मंत्रपाठः उत्सर्गे चतुर्थ्यंवरुणा
विष्णुनासह पुत्रांल्लक्ष्मीस्तथाकामानुभयोःस्त्रीकुमारयोः
अथाभ्याादिपंचकहोमः अग्निरैत्वित्यास्यमंत्राणांचतुर्णां
प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः अग्निर्देवताप्रतिमंत्रंहोमे
विनियोगः ॐ अग्निरेतुप्रथमोदेवतानांसोस्यप्रजांमुंचतु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.प. मृत्युपाशात् तदयꣳ राजा वरुणोनुमन्यतां यथेयꣳ स्त्री
३० मघवन्नरोदत्स्वाहा इदमग्नये ॐ इमामग्निस्त्रायतांगा
र्हपत्यः सोस्यै नयतु दीर्घमायुः अशून्योपस्था जीवताम
स्तु माता पौत्रमानंदमभिबुध्यतामियꣳ स्वाहा इदमग्नये
ॐ स्वस्तिनो अग्ने दिवापृथिव्या विश्वानि धेह्य यथा दशयदस्याम
पिदिवियातं प्रजास्तंतदस्मसु द्रविणं धेहि चित्रꣳ स्वाहा
इदमग्नये ॐ सुगन्नुपंथां प्रदिशन्न एहि ज्योतिष्मद्धेह्यजर
न अपतन्मृत्युरमृतं म आगाद्वैवस्वतो नोऽभयं कृणोतु स्वा रामः
हा नोऽभयं कृणोतु स्वाहा इदमग्नये वैवस्वताय अग्नो पिशि ३०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्टाचाराद्वधूवरस्त्वरापतद्योयमृतवेजुहोति परंमृत्युवीती
सवस्तुकंकऋषिः त्रिष्टुप्छंदोमृत्युर्देवताहोमेविनियोगः
ॐ परंमृत्युरनुपरेहिपंथां यस्तेऽन्यइतरोदेवयानात् चक्षु
ष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान्स्वा
स्वाहा इदंमृत्यवे उदकस्पर्शः अथापिदक्षिणा अद्येहामु
कशर्मासवधूकोहंकृतैतदग्न्यादिपंचकहोमकर्मणःसा
द्गुणपार्थं इमांदक्षिणामाचार्य्यब्राह्मणायथांशेनदास्ये मं
त्रपाठः गोविंदोगोकुलश्चैवगोपीभिश्चवहेरप्रियः तुष्टिपुष्टि
करोनित्यमुभयोःस्त्रीकुमारयोः ततआचम्य अथपाणिग्रह

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णोगमूतोलाजाहोमः अत्रकन्यायाकथनं आयुष्मानस्तु
वि.प. मेपतिरितिमंत्रलिंगात् कुमारीतिष्ठत्यंजलिं विदधाति व
३२ रस्तिष्ठन्कुमार्य्यंजलिंगृहीत्वा कुमार्य्याभ्राता लौकिका
ग्नि सिद्धान्लाजानुधृतेनाभिघार्य्य सूर्य्यं चतुर्द्धीकृत्वा
संप्रोक्ष्यतेष्वेकभागंकुमार्य्यंजलावावपति साचतिष्ठति
प्राङ्मुखीमंत्रंपठित्वाजुहुयात् अर्य्यमणमित्यथर्वणा ऋ
षिरनुष्टुप्छंदः अर्य्यमाग्निर्देवतालाजाहोमेविनियोगः
ॐ अर्य्यमणं देवं कन्या अग्निमयक्षत सनो अर्य्यमा देवता इतः
प्रेतु मापतेः स्वाहा इदमर्य्यम्णेऽग्नये इति प्रथमाहुतिं जुहो राम: ३२
ति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ति इयंनारीत्यथर्वणऋषिरनुष्टुप्छंदोऽर्य्यमाग्निर्देव
तालाजाहोमेविनियोगः ॐ इयंनार्य्युपब्रूतेलाजानाव
पयंतिका आयुष्मानस्तुमेपतिरेधतांज्ञातयोममस्वाहा इ
दमग्नये इमांलाजानामित्याथर्वणऋषिरनुष्टुप्छंदोऽर्य्य
माग्निर्देवतालाजाहोमेविनियोगः इमांलाजानावपाम्यग्नौ
समृद्धिकरणंतवममतुभ्यंचसंवदनंतदग्निरनुमन्यतामिय
ंस्वाहा इदमग्नये सर्वान्जुहोति अथवरोवध्वादक्षि
णहस्तंसांगुष्ठंगृह्णाति गृभ्णामित्यादीनांचतुर्णायाज्ञव
ल्क्यभारद्वाजाथर्वणऋषयस्त्रिष्टुबनुष्टुप्यजुःछंदांसिभ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.प.
३२

भगोर्य्यमासविता पुरंध्रयो देवताः कन्यायाः पाणिग्रहणे वि
नियोगः ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरद
ष्टिर्यथासः भगोर्य्यमः सविता पुरंध्रिर्मह्यं त्वादुर्गार्हपत्या
यदेवा अमोहमस्मि सात्वं हमस्य मोहं सायाहमस्मि ऋक्
त्वं द्यौरहं पृथिवी त्वं तावेहि विवाहे सहरेतो दधावहे प्रजांप्र
जनयावहे पुत्रान् विद्यान् वहेवहून् ते संतु जरदष्टयः श
षंविष्णुः सुमनस्यमानौ पश्येम शरदः शतं [illegible] जीवेम श
रदः शतं शृणुयाम शरदः शतम् अदीनाः स्याम शरदः शतं भू रामः
यश्च शरदः शतात् अथैनामश्मानमारोहयति ॐ आरोह ३२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ममपत्नी नमस्येवतत्वथंॅ स्थिराभव अभितिष्ठपृतनतस्पतोववा
धस्वपृतनायते आनूढायोवध्वांतस्याः शिरसिदक्षिणहस्तं
नीत्वा गाथांगायति सारस्वतीति विश्वामित्रर्षिरनुष्टुप्
छंदः सारस्वतीदेवतागाथागानेविनियोगः ॐसरस्वतीप्रेद
मवस्वभगवाजिनीवती यात्वांविश्वस्यभूतस्यप्रजायामस्या
ग्रतः यस्यांभूतथंॅ समभवद्यस्यां विश्वमिदंजगत् तामद्य
गाथांगास्यामियास्त्रीणामुत्तमंयशः मंत्रपादौवरस्येव अ
थवधूवरौदक्षिणमग्निंपरिक्रामतः वरएवमंत्रंपठति तुभ्य
तुभ्यमग्नइत्यथर्वणऋषिरनुष्टुपृछंदः अग्निर्देवतापरिक्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ ३४

मणोविनियोगः तुभ्यमग्नेपर्य्यवहानसूर्य्यांवहतुनासह
पुनः पतिभ्योजायादच्चग्नेप्रजयासह इतिमंत्रंपठन्कुमा
रीलाजान्वपंतीपरिक्रमणंकुर्यात एवंपुनर्वारद्वयेला
जाहोमोऽस्मारोहणंगाथागानपरिक्रमणानिकृत्वा तृ
तीयापरिक्रमणानंतरंकुमारीभ्रातास्रूर्पकोणप्रदेशेनस
र्वान्लाजानकुमारीहस्तेसावतिष्ठति ॐभगायस्वाहा इ
दंभगाय इतिकृत्वा ततःसमाचारात्स्त्रीचतुर्थपरिक्रम
णंकृत्वा यथास्थानमागत्योपविश्य ब्रह्मान्वारब्धः ॐअ रामः ३४
ग्नयेप्रजापतयेस्वाहा इदमग्नयेप्रजापतये इतिकृत्वा च

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

थसप्तवर्तिकाप्रज्वाल्य एनामुदीचिं सप्तपदानिक्रामयति
ॐ एकमुखेविष्णुस्त्वानयतु ॐ द्वेऊर्जे विष्णुस्त्वानयतु त्री
णीरायस्पोषायविष्णुस्त्वानयतु चत्वारिमायोभवायवि
ष्णुस्त्वानयतु पंचपशुभ्यांविष्णुस्त्वानयतु षड्ऋतुभ्योविष्णु
स्त्वानयतु सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वा
नयतु इतिमंत्रैःषट्वर्तिकानिर्वाप्य सप्तमीवर्तिकाज्वलंती
मेवस्थापयंतीवधूः ततोनिष्क्रमणप्रभृत्युदकुंभमादाय उ
त्तरतःस्थितो ब्राह्मणस्तस्यहस्तस्थंहस्ता ज्जलपात्रमादाय
तेनजलेनवरोमूर्द्धन्यभिषिंचति आपइतिप्रजापतिऋषिः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ ३५

प्रतिष्ठाछंदः आपोदेवतामूर्द्ध्नभिषेकेविनियोगः आपःशि
वाःशिवतमाः शांताःशान्ततमास्ताः यामवचेनस्वकुलवृद्धा
स्त्रियश्चकथ्यंतेस्तेहंएवंनिभेषजं ॐ आपोहिष्ठामयोभु
वस्तानऊर्ज्जेदधातुनःमहेरणायचक्षसेयोवःशिवतमार
सस्तस्यभाजयतेहनः उशतीरिवमातरः तस्माअरंगमामवो
यस्यक्षयायजिन्वथःआपोजनयथाचनः ततःसूर्य्यमुदी
क्षस्वेतिप्रेषितावधूःसूर्य्यमुदीक्षयति ॐ तच्चक्षुर्देवहितंपु
रस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजीवेमशारदःशतंशृ
णुयामशरदःशतंप्रब्रुवामःशरदःशतमहीनाःस्यामःश रामः
३५

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रदः शतम्मृयश्चशरदःशतात् अथवरोवध्वादक्षिणांशस्योपरि
हस्तंनीत्वाहृदयमालभ्यते ममव्रतइतिप्रजापतिऋषिस्त्रि
ष्टुप्छंदःप्रजापतिर्देवतावध्वाहृदयालंभनेविनियोगः ॐमम
व्रतेतेहृदयंद[illegible]धामिममचित्तमनुचित्तंतेस्तु ममवाच
मेकमनाजुषस्वप्रजापतिष्ट्वानियुनक्तुमह्यं अथैनाम
भिमंत्रयते सुमंगलीरितिप्रजापतिऋषिर्यजुः छंदःवधूर्देव
ताअभिमंत्रणेविनियोगः ॐसुमंगलीरियंवधूरिमांसमेत
पश्यत सौभाग्यमस्यैदत्वायथास्तोविपरेतन इतिमंत्रेणासीम
न्तेसिंदूरमपिदापयेतिवृद्धाः अथशिष्टाचाराद्वरस्यवामभागे

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वधूमुपवेशयेत्सा च धूर्वरस्यांचलं प्रगृह्य यथास्थाने निवेशय
वि॰प॰ ति अथाग्नेः पश्चात् उदग्वाऽऽनुडुहे चर्म्मणि रक्तवस्त्रखंडे वा
३६ कश्चित्पुरुषः वधूं तत्रोपवेशयति मंत्रः इह गावो इ
ति प्रजापतिर्ऋषिस्त्रिष्टुप्छंदो लिंगोक्ता देवता वधा उपवेश
ने विनियोगः ॐ इह गावो निषीदन्त्विहाश्वा इह पुरुषा इह सहस्र
दक्षिणा इह पुरुषा निषीदन्तु ततो यथास्थानमुपवेशयत्या
मवचनं कुर्य्यात् ग्रामवचनेन स्वकुलमर्य्यादा स्त्रियश्च क
र्वते च वधूहस्तेन वरस्य पादप्रक्षालनं वरवध्वोः परस्परं तिल रामः
कं द्व्यादि नाम्ना सह दधिगुडप्राशनं परस्परोच्छिष्टलापनं य ३६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यादेशकुलाचारं वा कुर्य्यात् विवाहश्मशानयोर्ग्रामवचन
प्रमाणमिति श्रुतेः ततआचम्य ब्रह्मन्वारब्धः ओं अग्नये स्वि
ष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः संस्रवप्राशनं पवित्र
प्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानं संकल्पः
अद्येहामुकशर्म्मा सवधूकोऽहं विवाहहोमकर्म्मणः सांगफ
लप्राप्तये पूर्णपूर्णार्थं इदं पूर्णपात्रं सद्रव्यं ब्रह्मणे तुभ्यं संप्र
ददे मंत्रपाठः अकन्नकर्म कृते तत अनवरः स्वाचार्याय वरं द
दाति गौर्ब्राह्मणस्य वरः ग्रामो राजन्यस्य अश्वो वैश्यस्येति स्
त्रे तत्र संकल्पः अद्येहेत्यादि अमुकशर्म्मा सवधूकोऽहं विवाह

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.प. ३

होमकर्मणः सांगफलप्राप्त्यर्थं साद्गुण्यार्थमिमां दक्षिणां ना
नागोत्रेभ्यो नदकर्त्तृकगायकेभ्यो दीनानाथेभ्यश्च विभज्य दास्ये
तत्सन्नमम इति संकल्प्य आचार्यादिभ्योऽन्येभ्यो ब्राह्मणेभ्यश्च
दक्षिणां दत्वा अभिषेकतिलकमंत्रपाठादि कृत्वा अथ वधूर्ध्रु
वं पश्येत् दिवा चेदस्तमितसूर्ये रात्रौ वरदानानंतरं ध्रुवमुदीक्षेत
तत्र मंत्रः ॐ ध्रुवमसीति प्रजापति ऋषिः पंक्तिश्छंदो ध्रुवा देवता
ध्रुवोदीक्षणे विनियोगः ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्या
मयि मह्यं त्वादाद्बृहस्पतिः मया पत्या प्रजावती संजीव शरदः शतमिति
मंत्रेण पश्येत् सायं दिनं पश्यामीति ब्रूयात् अथात्रिरात्रनियम रामः ३

पश्या

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मा: त्रिरात्रमक्षारालवणाशीस्यातां अधःशायी यातां संवत्सरं द्वि
रात्रं षड्रात्रं षड्रात्रं वा मैथुनं न कुर्य्यात् इतिशिक्षा ततः पंच
वाद्यपूर्वकं शालातोभ्यंतरेगत्वा जीवमातृपूजनंकुर्य्यात्
त्राचम्य अर्घ्यसंस्थाप्य पूजासंकल्पः अद्येह अमुकश
र्म्माःसवधूकोहं विवाहकर्म्मणुत्तरांगत्वेन सर्वाभ्युदयप्राप्तये
लिखितानां कल्याण्यादिजीवमातृणां पूजनं करिष्ये एतं ते इ
तिप्रतिष्ठा ॐभूर्भुवःस्वः कल्याण्यादी सप्तजीवमातरः सुप्रति
ष्ठिता वरदा भवंतु ध्यानं कल्याणी मंगला भद्रा पुण्या पुण्यमु
खी तथा जया च विजया चैव सप्तैता जीवमातरः इतिध्यात्वा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.प.
३८

नाममंत्रेणपूजनं ॐ कल्याण्यैनमः ॐ मंगलायैनमः ॐ भ
द्रायैनमः ॐ पुण्यायैनमः ॐ पुण्यमुख्यैनमः जयायैनमः
विजयायैनमः इतिनाममंत्रेणपाद्यादिनीराजनांतंसंपूज्य
वसोःपवित्रमसीतिवसोर्धाराःपातयित्वा पुष्पांजलिंसमर्प्य
दक्षिणांचदत्वा महानीराजनंचकृत्वा भोजनंविधाय श्व
श्रूश्वसुरयोःपादाभिवंद्य· वधूंशिविकादियानेनवाहयि
त्वा स्वगृहमागच्छन् स्वगृहमागत्यवरःस्वमातरंप्रणमेत्
स्वमाचादयःशिविकादियानाद्वधूमुत्तार्य्य· वधूःश्वश्र्वाहस्ता रामः
श्वश्रूपादयोःप्रणिपत्यश्वश्र्वंतत्पादतलेधृत्वा आशिर्भिर्वर्धयं ३८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिवंद्य गृहप्रवेशं कुर्य्यात् तत्र पूर्वे द्वारदेशे द्वारमातृपूजनं
विधाय लग्नदानं कुर्य्यात् तत्र संकल्पः अद्येहेत्यादि अ
मुकशर्म्मा सवधूकोहं अस्या वध्वाः पितृगृहात्स्वगृहप्रवे
शस्य गृहप्रवेशलग्नाद्यत्र कुत्र स्थितादित्यादिनवग्रहाणां
दुष्टानां दुष्टफलोपशान्त्यर्थं शुभफलप्राप्तये आदित्यादि
नवग्रहाणां प्रीतये इमां दक्षिणां ब्राह्मणेभ्यो दास्ये इति दक्षि
णां दत्वा अभ्यंतरे गत्वा जीवमातृपूजनं कुर्य्यात् आचम्या
र्घ्यं स्थाप्य अद्येहामुकशर्म्मा सवधूकोहं विवाहकर्म्मण
उत्तराङ्गत्वेन स्वगृहप्रवेशकर्म्मणि सर्वाभ्युदयप्राप्तये मिति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि॰प॰ ३९

लिखितानां कल्याणपादिजीवमातृणांपूजनंकारयेत् एतै
तेतिप्रतिष्ठाप्य कल्याणीमंगलाभद्रेतिमंत्रेणाध्यानावाहन
पाद्याद्यादिनीराजनांतंसंपूज्य वसोर्धारांपातयित्वा पुष्पांजलिं
समर्प्य दक्षिणांसंकल्पब्राह्मणेभ्योदत्वा चाभिषेकांतिलकं
मंत्रपाठादिकृत्वा ततोमातृश्वश्चादयोमहानीराजनंचकुर्या
त् वरवधूभ्यांदधिगुडप्राशनंकृत्वा यथासुखंविहरेतः इति

विवाहपद्धतिःसमाप्ता शुभम् सं॰ १९३७ वैशाख ५ गतेगुरुवारे रामः ३९

लिखितंश्रीरमापतीसर्म्मणाः पठनार्थलक्ष्मीरामशर्म्मणाः शुभं

दुर्गादत्त शर्मा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection